SI

G-DTN-M-TLSB

SANSKRIT
Paper II
(Literature)

Time Allowed : Three Hours | *Maximum Marks : 300*

INSTRUCTIONS

Candidates should attempt Question Nos. **1** *and* **5** *which are compulsory, and any* **three** *of the remaining questions, selecting at least* **one** *question from each Section.*

The number of marks carried by each question is indicated at the end of the question.

Question Nos. **4, 5** *and* **6** *must be answered in Sanskrit and the remaining questions must be answered either in Sanskrit or in the medium of examination specified in the Admission Certificate issued to you.*

Answers written in Sanskrit must be in Devanāgarī script

Important : Whenever a Question is being attempted, all its parts/sub-parts must be attempted contiguously. This means that before moving on to the next Question to be attempted, candidates must finish attempting all parts/sub-parts of the previous Question attempted. This is to be strictly followed.

Pages left blank in the answer-book are to be clearly struck out in ink. Any answers that follow pages left blank may not be given credit.

Optional Province · optionalprovince.com

Section 'A'

1. अधोनिर्दिष्टान् विषयानधिकृत्य स्वकीयान् विचारान् प्रमाण-पुरस्सरमुपपादयत। 12×5=60

(a) कुमारसम्भवे कालिदासेनाविष्कृतं पार्वत्याः प्रणयस्थैर्यं प्रपञ्चयत।

(b) माघमहाकवेः राजनीतिवैदुष्यं सप्रमाणं प्रकाशयत।

(c) कादम्बरीकर्तुः रसाविष्करणचातुरीं सोदाहरणं स्पष्टयत।

(d) किरातार्जुनीयस्य अर्थगौरवत्वं सप्रमाणं समर्थयत।

(e) 'नैषधं विद्वदौषधम्' इति वचनम् उपपत्तिपूर्वकं निरूपयत।

2. अधोनिर्दिष्टानां विषयाणां सारगर्भां समीक्षां कुरुत। 20×3=60

(a) ईशावास्योपनिषदि प्रतिपादितं आत्मतत्त्वम्।

(b) भगवद्गीतायाः सन्देशः।

(c) सुन्दरकाण्डे चित्रितः हनुमतः पराक्रमः।

3. कयोरपि द्वयोर्विषये टिप्पणीं रचयत। 30×2=60

(a) 'चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः' — स्वप्नवासवदत्ते वासवदत्तया अनुभूतं भाग्यविपर्ययं चित्रयत।

(b) मुद्राराक्षसस्य अन्वर्थनामता।

(c) भवभूतिना उत्तररामचरिते कृतानि मूलकथापरिवर्तनानि तेषामौचित्यं च।

4. संस्कृतभाषया नागराक्षरैरधस्तनेषु विषयेषु टिप्पणीरारचयत। 20×3=60

(a) नीतिशतकस्य आधुनिकप्रसक्तिः।

(b) हर्षचरिते चित्रितस्य हर्षवर्धनस्य गुणगरिमा।

(c) गीतगोविन्दस्य शैलीसौन्दर्यम्।

Optional Province · optionalprovince.com

Section 'B'

5. निम्नलिखितानि संस्कृतभाषायां विस्तरेण व्याख्यायन्ताम् । 12×5=60

(a) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥

(b) न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणाम्
अनङ्गलेखक्रिययोपयोगम् ॥

(c) सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥

(d) शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

(e) द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवोदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ।

6. अधोनिर्दिष्टानां तात्पर्यार्थं नागराक्षरैः संस्कृतभाषायां प्रतिपादयत । 20×3=60

(a) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥

(b) य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥

(c) पीडितां दुःखसंतप्तां परिक्षीणां तपस्विनीम् ।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम् ॥

Optional Province · optionalprovince.com

7. अधोलिखितानामाशयं सप्रकरणं विशदयत। 20×3=60

(a) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।

(b) धिक् तां च तं च मदनं च इमां च मां च।

(c) इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी लक्ष्मीः क्षीरसागरात्पारिजातपल्लवेभ्यो रागमिन्दुशकला-देकान्तवक्रतामुच्चैःश्रवसश्चञ्चलतां कालकूटान्मोहनशक्तिं मदिराया मदं कौस्तुभमणेरतिनैष्ठुर्यमित्येतानि सहवास-परिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता।

8. अधोलिखितानां श्लोकानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या। 20×3=60

(a) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥

(b) किं वक्ष्यतीति हृदयं परिशङ्कितं मे
कन्या मयाप्यपहृता न च रक्षिता सा।
भाग्यैश्चलैर्महदवाप्तगुणोपघातः
पुत्रः पितुर्जनितरोष इवास्मि भीतः।

(c) विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च॥

Optional Province · optionalprovince.com